ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, ह॒रि॒ः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठः

## (वाक्य सहित)

## षष्ठकाण्डे पञ्चमः प्रश्नः

**Notes:**

1. **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**

**Version 1.0** **September 30, 2021**

# Version Notes:

**This is now the current Version 1.0 dated September 30, 2021.**

1. This replaces the earlier version 0.1 dated March 31, 2020.

2. We have listened to the Pada Parayanam telecast by TTD channel. The corrections found have been updated . The corrections found and reported till September 30, 2021 are also updated.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 30th September 2018 |
| 2nd | Version Number | 0.0 dated 31st January 2019 |
| 3rd | Version Number | 0.1 dated 31st Mar 2020 |

# Contents

6 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे षष्ठं काण्डं 4

6.5 षष्ठकाण्डे पञ्चमः प्रश्नः – सोममन्त्रब्राह्मणनिरूपणं.4

ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, हरिः ओं

# 6 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे षष्ठं काण्डं

## 6.5 षष्ठकाण्डे पञ्चमः प्रश्नः – सोममन्त्रब्राह्मणनिरूपणं

**TS 6.5.1.1**

इन्द्रो वृत्राय वज्रमुदयच्छथ् स वृत्रो वज्रादुद्यतादबिभेथ् सो ऽब्रवीन्मा मे प्र हा–रस्ति वा इदं मयि वीर्यं तत् ते प्र दास्यामीति तस्मा उक्थ्यं प्रायच्छत् तस्मै द्वितीयमुदयच्छथ् सो ऽब्रवीन्मा मे प्र हारस्ति वा इदं मयि वीर्यं तत् ते प्र दास्यामीति– [ ] 1

**TS 6.5.1.1 - Padam**

इन्द्रः । वृत्राय । वज्रम् । उदिति । अयच्छत् । सः । वृत्रः । वज्रात् । उद्यतादित्युत्–यतात् । अबिभेत् । सः । अब्रवीत् । मा । मे । प्रेति । हाः । अस्ति । वै । इदम् । मयि । वीर्यम् । तत् । ते । प्रेति । दास्यामि । इति । तस्मै । उक्थ्यम् । प्रेति । अयच्छत् । तस्मै । द्वितीयम् । उदिति । अयच्छत् । सः । अब्रवीत् । मा । मे । प्रेति ।

हाः । अस्ति । वै । इदम् । मयि । वीर्यम् । तत् । ते । प्रेति ।
दास्यामि । इति । **1 (50)**

**TS 6.5.1.2**

तस्मा उक्थ्यमेव प्रायच्छत् तस्मै तृतीयमुदयच्छत् तं ँविष्णुरन्वतिष्ठत जहीति सोऽब्रवीन्मा मे प्र हारस्ति वा इदं मयि वीर्यं तत् ते प्र दास्यामीति तस्मा उक्थ्यमेव प्रायच्छत् तं निर्मायं भूतमहन् यज्ञो हि तस्य माया ऽऽसीद्–यदुक्थ्यो गृह्यत इन्द्रियमेव– [ ] **2**

**TS 6.5.1.2 - Padam**

तस्मै । उक्थ्यम् । एव । प्रेति । अयच्छत् । तस्मै । तृतीयम् ।
उदिति । अयच्छत् । तम् । विष्णुः । अन्विति । अतिष्ठत । जहि ।
इति । सः । अब्रवीत् । मा । मे । प्रेति । हाः । अस्ति । वै । इदम् ।
मयि । वीर्यम् । तत् । ते । प्रेति । दास्यामि । इति । तस्मै ।
उक्थ्यम् । एव । प्रेति । अयच्छत् । तम् । निर्मायमिति निः–मायम् ।
भूतम् । अहन्न् । यज्ञः । हि । तस्य । माया । आसीत् । यत् ।
उक्थ्यः । गृह्यते । इन्द्रियम् । एव । **2 (50)**

**TS 6.5.1.3**

तद् वीर्यं यजमानो भ्रातृव्यस्य वृङ्क्त इन्द्राय त्वा बृहद्वते वयस्वत
इत्याहेन्द्राय हि स तं प्रायच्छत् तस्मै त्वा विष्णवे त्वेत्याह यदेव
विष्णुरन्वतिष्ठत जहीति तस्माद्–विष्णुमन्वाभजति त्रिर्निर्गृह्णाति त्रिर्.
हि स तं तस्मै प्रायच्छदेष ते योनिः पुनर्.हवि–रसीत्याह
पुनःपुन– [ ] **3**

**TS 6.5.1.3 - Padam**

तत् । वीर्यम् । यजमानः । भ्रातृव्यस्य । वृङ्क्ते । इन्द्राय । त्वा । बृहद्वत
इति बृहत् – वते । वयस्वते । इति । आह । इन्द्राय । हि । सः ।
तम् । प्रेति । अयच्छत् । तस्मै । त्वा । विष्णवे । त्वा । इति । आह ।
यत् । एव । विष्णुः । अन्वतिष्ठतेत्यनु – अतिष्ठत । जहि । इति ।
तस्मात् । विष्णुम् । अन्वाभजतीत्यनु – आभजति । त्रिः । निरिति ।
गृह्णाति । त्रिः । हि । सः । तम् । तस्मै । प्रेति । अयच्छत् । एषः ।
ते । योनिः । पुनर्.हविरिति पुनः – हविः । असि । इति ।
आह । पुनःपुनरिति पुनः – पुनः । **3 (50)**

**TS 6.5.1.4**

ह्य॑स्मा–न्निर्गृ॒ह्णा॒ति च॒क्षु॒र्वा ए॒तद्–य॒ज्ञस्य॒ यदु॒क्थ्य॑–स्तस्मा॑दु॒क्थ्य॑ꣳ
हु॒तꣳ सोमा॑ अ॒न्वाय॑न्ति॒ तस्मा॑दा॒त्मा चक्षु॑र॒न्वे॑ति॒ तस्मा॒देक॒ꣳ॑ यन्तं॑
ब॒हवो॑ऽनु य॒न्ति॒ तस्मा॒देको॑ ब॒हू॒नां भ॒द्रो भ॑वति॒ तस्मा॒देको॑ ब॒ह्वीर्जा॒या
वि॑न्दते॒ य॑दि का॒मये॑ता–द्ध्व॒र्यु॒–रा॒त्मानं॑ यज्ञयशसे॒नार्प॑येय॒–
मि॑त्य॒न्त॑राऽऽह॒व॑नीयं॑ च ह॒वि॒र्द्धा॑नं च॒ ति॒ष्ठन्न॑व नये– [ ] **4**

**TS 6.5.1.4 - Padam**

हि । अ॒स्मा॒त् । नि॒र्गृ॒ह्णा॒तीति॑ निः – गृ॒ह्णाति॑ । चक्षुः॑ । वै । ए॒तत् ।
य॒ज्ञस्य॑ । यत् । उ॒क्थ्यः॑ । तस्मा॑त् । उ॒क्थ्य॑म् । हु॒तम् । सोमाः॑ ।
अ॒न्वा॒यन्तीत्य॑नु – आय॑न्ति । तस्मा॑त् । आ॒त्मा । चक्षुः॑ । अन्विति॑ ।
ए॒ति॒ । तस्मा॑त् । एक॑म् । यन्त॑म् । ब॒हवः॑ । अन्विति॑ । य॒न्ति॒ ।
तस्मा॑त् । एकः॑ । ब॒हू॒नाम् । भ॒द्रः । भ॒व॒ति॒ । तस्मा॑त् । एकः॑ ।
ब॒ह्वीः । जा॒याः । वि॒न्द॒ते॒ । यदि॑ । का॒मये॑त । अ॒द्ध्व॒र्युः ।
आ॒त्मान॑म् । य॒ज्ञ॒य॒श॒सेनेति॑ यज्ञ – य॒श॒सेन॑ । अ॒र्प॒ये॒य॒म् । इति॑ ।

अन्तरा । आहवनीयमित्या – हवनीयम् । च । हविर्द्धानमिति हविः – धानम् । च । तिष्ठन्न् । अवेति । नयेत् । **4 (50)**

**TS 6.5.1.5**

दात्मानमेव यज्ञयशसेनार्पयति यदि कामयेत यजमानं ँयज्ञ यशसेनार्पयेय–मित्यन्तरा सदोहविर्द्धाने तिष्ठन्नव नयेद्–यजमानमेव यज्ञयशसेना–र्पयति यदि कामयेत सदस्यान् यज्ञ यशसेनार्पयेयमिति सद आलभ्याव नयेथ् सदस्यानेव यज्ञयशसेनार्पयति ॥ **5**

**TS 6.5.1.5 - Padam**

आत्मानम् । एव । यज्ञयशसेनेति यज्ञ–यशसेन । अर्पयति । यदि । कामयेत । यजमानम् । यज्ञयशसेनेति यज्ञ – यशसेन । अर्पयेयम् । इति । अन्तरा । सदोहविर्द्धाने इति सदः – हविर्द्धाने । तिष्ठन्न् । अवेति । नयेत् । यजमानम् । एव । यज्ञयशसेनेति यज्ञ – यशसेन । अर्पयति । यदि । कामयेत । सदस्यान् ।

यज्ञयशसेनेति यज्ञ – यशसेन । अर्पयेयम् । इति । सदः ।

आलभ्येत्या – लभ्य । अवेति । नयेत् । सदस्यान् । एव ।

यज्ञयशसेनेति यज्ञ - यशसेन । अर्पयति ॥ **5 (33)**

*(इती - न्द्रियमेव - पुनःपुन - र्नयेत् - त्रयस्त्रिꣳशच्च) (A1)*

**TS 6.5.2.1**

आयुर्वा एतद्-यज्ञस्य यद् ध्रुव उत्तमो ग्रहाणां गृह्यते तस्मादायुः प्राणानामुत्तमं मूर्द्धानं दिवो अरतिं पृथिव्या इत्याह मूर्द्धानमेवैनꣳ समानानां करोति वैश्वानरमृताय जातमग्निमित्याह वैश्वानरꣳ हि देवतया ऽऽयु-रुभयतोवैश्वानरो गृह्यते तस्मादुभयतः प्राणा अधस्ता-च्चोपरिष्टा-च्चार्द्धिनो ऽन्ये ग्रहा गृह्यन्ते ऽर्द्धी ध्रुवस्तस्मा- [ ] **6**

**TS 6.5.2.1 - Padam**

आयुः । वै । एतत् । यज्ञस्य । यत् । ध्रुवः । उत्तम इत्युत् - तमः । ग्रहाणाम् । गृह्यते । तस्मात् । आयुः । प्राणानामिति प्र - अनानाम् । उत्तममित्युत्-तमम् । मूर्द्धानम् । दिवः । अरतिम् । पृथिव्याः । इति । आह । मूर्द्धानम् । एव । एनम् । समानानाम् । करोति । वैश्वानरम् । ऋताय । जातम् । अग्निम् । इति । आह । वैश्वानरम् । हि । देवतया । आयुः । उभयतोवैश्वानर इत्युभयतः - वैश्वानरः । गृह्यते । तस्मात् ।

उभयतः । प्राणा इति प्र – अनाः । अधस्तात् । च । उपरिष्टात् । च ।
अर्द्धिनः । अन्ये । ग्रहाः । गृह्यन्ते । अर्द्धी । ध्रुवः ।
तस्मात् । **6 (50)**

**TS 6.5.2.2**

–दर्द्ध्यवाङ् प्राणो ऽन्येषां प्राणानामुपोप्ते ऽन्ये ग्रहाः साद्यन्ते ऽनुपोप्ते
ध्रुव–स्तस्मा–दस्थ्ना ऽन्याः प्रजाः प्रतितिष्ठन्ति मा॒ꣳसेनान्या असुरा
वा उत्तरतः पृथिवीं पर्याचिकीर्.षन् तां देवा ध्रुवेणादृꣳहन् तद्
ध्रुवस्य ध्रुवत्वं ँयद् ध्रुव उत्तरतः साद्यते धृत्या आयुर्वा एतद्–
यज्ञस्य यद् ध्रुव आत्मा होता यद्धोतृचमसे ध्रुव–मवनयत्यात्मन्नेव
यज्ञस्या– [ ] **7**

**TS 6.5.2.2 - Padam**

अर्द्धी । अवाङ् । प्राण इति प्र – अनः । अन्येषाम् । प्राणानामिति
प्र – अनानाम् । उपोप्त इत्युप – उप्ते । अन्ये । ग्रहाः । साद्यन्ते ।
अनुपोप्त इत्यनुप – उप्ते । ध्रुवः । तस्मात् । अस्थ्ना । अन्याः ।
प्रजा इति प्र – जाः । प्रतितिष्ठन्तीति प्रति – तिष्ठन्ति । मा॒ꣳसेन ।
अन्याः । असुराः । वै । उत्तरत इत्युत् – तरतः । पृथिवीम् ।

पर्याचिकीर्.षन्निति परि – आचिकीर्.षन्न् । ताम् । देवाः । ध्रुवेण ।
अदृ॒ꣳहन्न् । तत् । ध्रुवस्य । ध्रुवत्वमिति ध्रुव – त्वम् । यत् । ध्रुवः ।
उत्तरत इत्युत् – तरतः । साद्यते । धृत्यै । आयुः । वै । एतत् ।
यज्ञस्य । यत् । ध्रुवः । आत्मा । होता । यत् । होतृचमस
इति होतृ – चमसे । ध्रुवम् । अवनयतीत्यव – नयति । आत्मन्न् ।
एव । यज्ञस्य । **7 (50)**

**<u>TS 6.5.2.3</u>**

–युर्दधाति पुरस्तादुक्थस्यावनीय इत्याहुः पुरस्ताद्ध्यायुषो भुङ्क्ते
मद्ध्यतो ऽवनीय इत्याहुर्मद्ध्यमेन ह्यायुषो भुङ्क्त उत्तरार्द्धे ऽवनीय
इत्याहुरुत्तमेन ह्यायुषो भुङ्क्ते वैश्वदेव्यामृचि शस्यमानाया–मव नयति
वैश्वदेव्यो वै प्रजाः प्रजास्वेवाऽऽयुर्दधाति ॥ **8**

**<u>TS 6.5.2.3 - Padam</u>**

आयुः । दधाति । पुरस्तात् । उक्थस्य । अवनीय इत्यव – नीयः ।
इति । आहुः । पुरस्तात् । हि । आयुषः । भुङ्क्ते । मद्ध्यतः ।
अवनीय इत्यव – नीयः । इति । आहुः । मद्ध्यमेन । हि ।

आयुषः । भुङ्क्ते । उत्तरार्द्ध इत्युत्तर – अर्द्धे ।

अवनीय इत्यव – नीयः । इति । आहुः । उत्तमेनेत्युत् – तमेन ।

हि । आयुषः । भुङ्क्ते । वैश्वदेव्यामिति वैश्व – देव्याम् । ऋचि ।

शस्यमानायाम् । अवेति । नयति ।

वैश्वदेव्य इति वैश्व – देव्यः । वै । प्रजा इति प्र – जाः ।

प्रजास्विति प्र – जासु । एव । आयुः । दधाति ॥ **8 (39)**

*(ध्रुवस्तस्मा – देव यज्ञस्यै – कान्नचत्वारिꣳशच्च) (A2)*

**TS 6.5.3.1**

यज्ञेन वै देवाः सुवर्गं ँलोकमायन् ते ऽमन्यन्त मनुष्या

नो ऽन्वाभविष्यन्तीति ते सँवथ्सरेण योपयित्वा सुवर्गं ँलोकमायन्

तमृषय ऋतुग्रहै–रेवानु प्राजानन्. यदृतुग्रहा गृह्यन्ते सुवर्गस्य लोकस्य

प्रज्ञात्यै द्वादश गृह्यन्ते द्वादश मासाः सँवथ्सरः सँवथ्सरस्य प्रज्ञात्यै

सह प्रथमौ गृह्येते सहोत्तमौ तस्माद् द्वौद्वावृतू उभयतोमुख–मृतुपात्रं

भवति को– [ ] **9**

**TS 6.5.3.1 - Padam**

यज्ञेन । वै । देवाः । सुवर्गमिति सुवः – गम् । लोकम् । आयन्न् ।
ते । अमन्यन्त । मनुष्याः । नः । अन्वाभविष्यन्तीत्यनु–आभविष्यन्ति ।
इति । ते । सँवथ्सरेणेति सं – वथ्सरेण । योपयित्वा ।
सुवर्गमिति सुवः – गम् । लोकम् । आयन्न् । तम् । ऋषयः ।
ऋतुग्रहैरित्यृतु – ग्रहैः । एव । अनु । प्रेति । अजानन्न् । यत् ।
ऋतुग्रहा इत्यृतु – ग्रहाः । गृह्यन्ते । सुवर्गस्येति सुवः – गस्य ।
लोकस्य । प्रज्ञात्या इति प्र – ज्ञात्यै । द्वादश । गृह्यन्ते । द्वादश ।
मासाः । सँवथ्सर इति सं – वथ्सरः ।
सँवथ्सरस्येति सं – वथ्सरस्य । प्रज्ञात्या इति प्र – ज्ञात्यै । सह ।
प्रथमौ । गृह्येते इति । सह । उत्तमावित्युत् – तमौ । तस्मात् ।
द्वौद्वाविति द्वौ – द्वौ । ऋतू इति । उभयतोमुखमित्युभयतः – मुखम् ।
ऋतुपात्रमित्यृतु – पात्रम् । भवति । कः । **9 (50)**

**TS 6.5.3.2**

हि तद्–वेद यत ऋतूनां मुखमृतुना प्रेष्येति षट् कृत्व आह
षड्वा ऋतव ऋतूनेव प्रीणात्यृतुभिरिति चतुश्चतुष्पद एव पशून्
प्रीणाति द्विः पुनर्. ऋतुना ऽऽह द्विपद एव प्रीणात्यृतुना प्रेष्येति
षट् कृत्व आहर्तुभिरिति चतुस्तस्मा–च्चतुष्पादः पशव
ऋतूनुप जीवन्ति द्विः– [ ] **10**

**TS 6.5.3.2 - Padam**

हि । तत् । वेद । यतः । ऋतूनाम् । मुखम् । ऋतुना । प्रेति । इष्य ।
इति । षट् । कृत्वः । आह । षट् । वै । ऋतवः । ऋतून् । एव ।
प्रीणाति । ऋतुभिरित्यृतु – भिः । इति । चतुः । चतुष्पद इति
चतुः – पदः । एव । पशून् । प्रीणाति । द्विः । पुनः । ऋतुना ।
आह । द्विपद इति द्वि – पदः । एव । प्रीणाति । ऋतुना । प्रेति ।
इष्य । इति । षट् । कृत्वः । आह । ऋतुभिरित्यृतु – भिः । इति ।
चतुः । तस्मात् । चतुष्पाद इति चतुः – पादः । पशवः । ऋतून् ।
उपेति । जीवन्ति । द्विः । **10 (50)**

**TS 6.5.3.3**

पुनर्. ऋतुना ऽऽह तस्माद्–द्विपादश्चतुष्पदः पशूनुप जीवन्त्यृतुना प्रेष्येति षट् कृत्व आहर्तुभिरिति चतुर्द्धिः पुनर्. ऋतुना ऽऽहा ऽऽक्रमणमेव तथ् सेतुं ँयजमानः कुरुते सुवर्गस्य लोकस्य समष्ट्यै नान्यो ऽन्यमनु प्र पद्येत यदन्यो ऽन्यमनुप्रपद्येतर्तुर्. ऋतुमनु प्रपद्येतर्तवो मोहुकाः स्युः– [ ] **11**

**TS 6.5.3.3 - Padam**

पुनः । ऋतुना । आह । तस्मात् । द्विपाद इति द्वि – पादः । चतुष्पद इति चतुः – पदः । पशून् । उपेति । जीवन्ति । ऋतुना । प्रेति । इष्य । इति । षट् । कृत्वः । आह । ऋतुभिरित्यृतु – भिः । इति । चतुः । द्विः । पुनः । ऋतुना । आह । आक्रमणमित्या – क्रमणम् । एव । तत् । सेतुम् । यजमानः । कुरुते । सुवर्गस्येति सुवः – गस्य । लोकस्य । समष्ट्या इति सं – अष्ट्यै । न । अन्यः । अन्यम् । अनु । प्रेति । पद्येत । यत् । अन्यः । अन्यम् ।

अनुप्रपद्येतेत्यनु – प्रपद्येत । ऋतुः । ऋतुम् । अनु । प्रेति । पद्येत ।
ऋतवः । मोहुकाः । स्युः । **11 (50)**

**TS 6.5.3.4**

प्रसिद्धमेवा–द्ध्वर्युर्दक्षिणेन प्र पद्यते प्रसिद्धं प्रतिप्रस्थातोत्तरेण
तस्मादादित्यः षण्मासो दक्षिणेनैति षडुत्तरेणो–पयामगृहीतो ऽसि
स꣡ꣳसर्पो ऽस्यꣳहस्पत्याय त्वेत्याहास्ति त्रयोदशो मास इत्याहुस्तमेव
तत् प्रीणाति ॥ **12**

**TS 6.5.3.4 - Padam**

प्रसिद्धमिति प्र – सिद्धम् । एव । अद्ध्वर्युः । दक्षिणेन । प्रेति ।
पद्यते । प्रसिद्धमिति प्र – सिद्धम् । प्रतिप्रस्थातेति प्रति–प्रस्थाता ।
उत्तरेणेत्युत्–तरेण । तस्मात् । आदित्यः । षट् । मासः । दक्षिणेन ।
एति । षट् । उत्तरेणेत्युत्–तरेण । उपयामगृहीत इत्युपयाम–गृहीतः ।
असि । सꣳसर्प इति सं – सर्पः । असि ।
अꣳहस्पत्यायेत्यꣳहः – पत्याय । त्वा । इति । आह । अस्ति ।
त्रयोदश इति त्रयः – दशः । मासः । इति । आहुः ।
तम् । एव । तत् । प्रीणाति ॥ **12 (34)**

*(को - जीवन्ति द्विः - स्यु - श्चतुस्त्रिꣳशच्च) (A3)*

**TS 6.5.4.1**

सुवर्गाय वा एते लोकाय गृह्यन्ते यदृतुग्रहा ज्योतिरिन्द्राग्नी
यदैन्द्राग्नमृतुपात्रेण गृह्णाति ज्योतिरेवास्मा उपरिष्टाद्-दधाति
सुवर्गस्य लोकस्यानुख्यात्या ओजोभृतौ वा एतौ देवानां ँयदिन्द्राग्नी
यदैन्द्राग्नो गृह्यत ओज एवाव रुन्धे वैश्वदेवꣳ शुक्रपात्रेण
गृह्णाति वैश्वदेव्यो वै प्रजा असावादित्यः शुक्रो यद्-वैश्वदेवꣳ
शुक्रपात्रेण गृह्णाति तस्मादसावादित्यः- [ ] **13**

**TS 6.5.4.1 - Padam**

सुवर्गायेति सुवः - गाय । वै । एते । लोकाय । गृह्यन्ते । यत् ।
ऋतुग्रहा इत्यृतु - ग्रहाः । ज्योतिः । इन्द्राग्नी इतीन्द्र - अग्नी ।
यत् । ऐन्द्राग्नमित्यैन्द्र - अग्नम् । ऋतुपात्रेणेत्यृतु - पात्रेण ।
गृह्णाति । ज्योतिः । एव । अस्मै । उपरिष्टात् । दधाति ।
सुवर्गसेति सुवः-गस्य । लोकस्य । अनुख्यात्या इत्यनु - ख्यात्यै ।

ओजोभृतावित्योजः – भृतौ । वै । एतौ । देवानाम् । यत् । इन्द्राग्नी इतीन्द्र – अग्नी । यत् । ऐन्द्राग्न इत्यैन्द्र–अग्नः । गृह्यते । ओजः । एव । अवेति । रुन्धे । वैश्वदेवमिति वैश्व – देवम् । शुक्रपात्रेणेति शुक्र – पात्रेण । गृह्णाति । वैश्वदेव्य इति वैश्व – देव्यः । वै । प्रजा इति प्र – जाः । असौ । आदित्यः । शुक्रः । यत् । वैश्वदेवमिति वैश्व – देवम् । शुक्रपात्रेणेति शुक्र – पात्रेण । गृह्णाति । तस्मात् । असौ । आदित्यः । **13 (50)**

**TS 6.5.4.2**

सर्वाः प्रजाः प्रत्यङ्ङुदेति तस्माथ् सर्व एव मन्यते मां प्रत्युदगादिति वैश्वदेव॑ शुक्रपात्रेण गृह्णाति वैश्वदेव्यो वै प्रजास्तेजः शुक्रो यद्– वैश्वदेव॑ शुक्रपात्रेण गृह्णाति प्रजास्वेव तेजो दधाति ॥ **14**

**TS 6.5.4.2 - Padam**

सर्वाः । प्रजा इति प्र – जाः । प्रत्यङ्ङ् । उदिति । एति । तस्मात् । सर्वः । एव । मन्यते । माम् । प्रति । उदिति । अगात् । इति । वैश्वदेवमिति वैश्व – देवम् । शुक्रपात्रेणेति शुक्र–पात्रेण । गृह्णाति । वैश्वदेव्य इति वैश्व – देव्यः । वै । प्रजा इति प्र – जाः । तेजः ।

शुक्रः । यत् । वैश्वदेवमिति वैश्व – देवम् ।

शुक्रपात्रेणेति शुक्र – पात्रेण । गृह्णाति । प्रजास्विति प्र – जासु ।

एव । तेजः । दधाति ॥ **14 (30)**

*(तस्मादसावादित्य – स्त्रि॒ꣳशच्च) (A4)*

**TS 6.5.5.1**

इन्द्रो मरुद्भिः साँविद्येन माद्ध्यन्दिने सवने वृत्रमहन्. यन्माद्ध्यन्दिने सवने मरुत्वतीया गृह्यन्ते वार्त्रघ्ना एव ते यजमानस्य गृह्यन्ते तस्य वृत्रं जघ्नुष ऋतवो ऽमुह्यन्थ् स ऋतुपात्रेण मरुत्वतीयानगृह्णात् ततो वै स ऋतून् प्राजानाद्–यदृतुपात्रेण मरुत्वतीया गृह्यन्त ऋतूनां प्रज्ञात्यै वज्रं ँवा एतं ँयजमानो भ्रातृव्याय प्र हरति यन्मरुत्वतीया उदेव प्रथमेन– [ ] **15**

**TS 6.5.5.1 - Padam**

इन्द्रः । मरुद्भिरिति मरुत् – भिः । साँविद्येनेति सां – विद्येन ।

माद्ध्यन्दिने । सवने । वृत्रम् । अहन्न् । यत् । माद्ध्यन्दिने । सवने ।

मरुत्वतीयाः । गृह्यन्ते । वार्त्रघ्ना इति वार्त्र – घ्नाः । एव । ते ।

यजमानस्य । गृह्यन्ते । तस्य । वृत्रम् । जघ्नुषः । ऋतवः । अमुह्यन्न् ।
सः । ऋतुपात्रेणेत्यृतु – पात्रेण । मरुत्वतीयान् । अगृह्णात् । ततः ।
वै । सः । ऋतून् । प्रेति । अजानात् । यत् । ऋतुपात्रेणेत्यृतु–पात्रेण ।
मरुत्वतीयाः । गृह्यन्ते । ऋतूनाम् । प्रज्ञात्या इति प्र–ज्ञात्यै । वज्रम् ।
वै । एतम् । यजमानः । भ्रातृव्याय । प्रेति । हरति । यत् ।
मरुत्वतीयाः । उदिति । एव । प्रथमेन । **15 (50)**

## TS 6.5.5.2

यच्छति प्र हरति द्वितीयेन स्तृणुते तृतीयेनाऽऽयुधं ँवा एतद्–यजमानः
स७ स्कुरुते यन्मरुत्वतीया धनुरेव प्रथमो ज्या द्वितीय इषुस्तृतीयः
प्रत्येव प्रथमेन धत्ते वि सृजति द्वितीयेन विद्ध्यति
तृतीयेनेन्द्रो वृत्र७ं हत्वा परां परावत–मगच्छ–दपाराधमिति मन्यमानः
स हरितो ऽभवथ् स एतान् मरुत्वतीया–नात्मस्परणा–नपश्यत्
तानगृह्णीत– [ ] **16**

## TS 6.5.5.2 - Padam

यच्छति । प्रेति । हरति । द्वितीयेन । स्तृणुते । तृतीयेन । आयुधम् ।
वै । एतत् । यजमानः । समिति । कुरुते । यत् । मरुत्वतीयाः ।

धनुः । एव । प्रथमः । ज्या । द्वितीयः । इषुः । तृतीयः । प्रतीति ।
एव । प्रथमेन । धत्ते । वीति । सृजति । द्वितीयेन । विद्ध्यति ।
तृतीयेन । इन्द्रः । वृत्रम् । हत्वा । पराम् । परावतमिति परा–वतम् ।
अगच्छत् । अपेति । अराधम् । इति । मन्यमानः । सः । हरितः ।
अभवत् । सः । एतान् । मरुत्वतीयान् । आत्मस्परणानित्यात्म –
स्परणान् । अपश्यत् । तान् । अगृह्णीत । **16 (50)**

**TS 6.5.5.3**

प्राणमेव प्रथमेना–स्पृणुतापानं द्वितीयेनाऽऽत्मानं तृतीयेनाऽऽत्मस्परणा
वा एते यजमानस्य गृह्यन्ते यन्मरुत्वतीयाः प्राणमेव प्रथमेन स्पृणुते
ऽपानं द्वितीयेनाऽऽत्मानं तृतीयेनेन्द्रो वृत्रमहन् तं देवा अब्रुवन् महान्.
वा अयमभूद्–यो वृत्रमवधीदिति तन्महेन्द्रस्य महेन्द्रत्वꣳ
स एतं माहेन्द्र–मुद्धार–मुदहरत वृत्रꣳ हत्वा ऽन्यासु देवतास्व ( )
धि यन्माहेन्द्रो गृह्यत उद्धारमेव तं ँयजमान उद्धरते ऽन्यासु प्रजास्वधि
शुक्रपात्रेण गृह्णाति यजमानदेवत्यो वै माहेन्द्रस्तेजः शुक्रो
यन्माहेन्द्रꣳ शुक्रपात्रेण गृह्णाति यजमान एव तेजो दधाति ॥ **17**

**TS 6.5.5.3 - Padam**

प्राणमिति प्र - अनम् । एव । प्रथमेन । अस्पृणुत ।
अपानमित्यप - अनम् । द्वितीयेन । आत्मानम् । तृतीयेन ।
आत्मस्परणा इत्यात्म - स्परणाः । वै । एते । यजमानस्य । गृह्यन्ते ।
यत् । मरुत्वतीयाः । प्राणमिति प्र - अनम् । एव । प्रथमेन ।
स्पृणुते । अपानमित्यप-अनम् । द्वितीयेन । आत्मानम् । तृतीयेन ।
इन्द्रः । वृत्रम् । अहन्न् । तम् । देवाः । अब्रुवन्न् । महान् । वै ।
अयम् । अभूत् । यः । वृत्रम् । अवधीत् । इति । तत् । महेन्द्रस्येति
महा - इन्द्रस्य । महेन्द्रत्वमिति महेन्द्र - त्वम् । सः । एतम् ।
माहेन्द्रमिति माहा - इन्द्रम् । उद्धारमित्युत् - हारम् । उदिति ।
अहरत । वृत्रम् । हत्वा । अन्यासु । देवतासु ( ) । अधीति । यत् ।
माहेन्द्र इति माहा - इन्द्रः । गृह्यते । उद्धारमित्युत् - हारम् । एव ।
तम् । यजमानः । उदिति । हरते । अन्यासु । प्रजास्विति प्र-जासु ।
अधीति । शुक्रपात्रेणेति शुक्र - पात्रेण । गृह्णाति । यजमानदेवत्य
इति यजमान - देवत्यः । वै । माहेन्द्र इति माहा - इन्द्रः । तेजः ।

शुक्रः । यत् । माहेन्द्रमिति माहा – इन्द्रम् ।

शुक्रपात्रेणेति शुक्र – पात्रेण । गृह्णाति । यजमाने । एव । तेजः ।

दधाति ॥ **17 (78)**

*(प्रथमेना – गृह्णीत – देवतास्व – ष्षाविꣳशतिश्च) (A5)*

**TS 6.5.6.1**

अदितिः पुत्रकामा साद्ध्येभ्यो देवेभ्यो ब्रह्मौदन–मपचत् तस्या

उच्छेषण–मददु–स्तत् प्राश्ञाथ् सा रेतो ऽधत्त तस्यै चत्वार आदित्या

अजायन्त सा द्वितीयमपचथ् सा ऽमन्यतोच्छेषणान्म इमेऽज्ञत

यदग्रे प्राशिष्यामीतो मे वसीयाꣳसो जनिष्यन्त इति सा ऽग्रे प्राश्ञाथ्

सा रेतो ऽधत्त तस्यै व्यृद्ध–माण्डमजायत साऽऽदित्येभ्य एव–[ ] **18**

**TS 6.5.6.1 - Padam**

अदितिः । पुत्रकामेति पुत्र – कामा । साद्ध्येभ्यः । देवेभ्यः ।

ब्रह्मौदनमिति ब्रह्म – ओदनम् । अपचत् । तस्यै ।

उच्छेषणमित्युत्–शेषणम् । अददुः । तत् । प्रेति । आश्ञात् । सा ।

रेतः । अधत्त । तस्यै । चत्वारः । आदित्याः । अजायन्त । सा ।

द्वितीयम् । अपचत् । सा । अमन्यत । उच्छेषणादित्युत् – शेषणात् । मे । इमे । अज्ञत । यत् । अग्रे । प्राशिष्यामीति प्र – अशिष्यामि । इतः । मे । वसीयाꣳसः । जनिष्यन्ते । इति । सा । अग्रे । प्रेति । आश्ञात् । सा । रेतः । अधत्त । तस्यै । व्यृद्धमिति वि – ऋद्धम् । आण्डम् । अजायत । सा । आदित्येभ्यः । एव । **18 (50)**

**TS 6.5.6.2**

तृतीयमपचद्–भोगाय म इदꣳ श्रान्तमस्त्विति ते ऽब्रुवन् वरं ँवृणामहै यो ऽतो जायाता अस्माकꣳ स एको ऽसद्–यो ऽस्य प्रजायामृद्ध्याता अस्माकं भोगाय भवादिति ततो विवस्वानादित्यो ऽजायत तस्य वा इयं प्रजा यन्मनुष्यास्तास्वेक एवर्द्धो यो यजते स देवानां भोगाय भवति देवा वै यज्ञाद्– [ ] **19**

**TS 6.5.6.2 - Padam**

तृतीयम् । अपचत् । भोगाय । मे । इदम् । श्रान्तम् । अस्तु । इति । ते । अब्रुवन्न् । वरम् । वृणामहै । यः । अतः । जायातै । अस्माकम् । सः । एकः । असत् । यः । अस्य । प्रजायामिति प्र – जायाम् । ऋद्ध्यातै । अस्माकम् । भोगाय । भवात् । इति । ततः । विवस्वान् ।

आदित्यः । अजायत । तस्य । वै । इयम् । प्रजेति प्र - जा । यत् ।
मनुष्याः । तासु । एकः । एव । ऋद्धः । यः । यजते । सः ।
देवानाम् । भोगाय । भवति । देवाः । वै । यज्ञात् । **19 (50)**

**TS 6.5.6.3**

रुद्र-मन्त-रायन्थ् स आदित्यानन्वाक्रमत ते द्विदेवत्यान् प्रापद्यन्त
तान् न प्रति प्रायच्छन् तस्मादपि वद्ध्यं प्रपन्नं न प्रति प्र यच्छन्ति
तस्माद् द्विदेवत्येभ्य आदित्यो निर्गृह्यते यदुच्छेषणा-दजायन्त
तस्मादुच्छेषणाद्-गृह्यते तिसृभिर्. ऋग्भिर्गृह्णाति माता पिता
पुत्रस्तदेव तन्मिथुनमुल्बं गर्भो जरायु तदेव तन्- [ ] **20**

**TS 6.5.6.3 - Padam**

रुद्रम् । अन्तः । आयन्न् । सः । आदित्यान् ।
अन्वाक्रमतेत्यनु - आक्रमत । ते । द्विदेवत्यानिति द्वि - देवत्यान् ।
प्रेति । अपद्यन्त । तान् । न । प्रति । प्रेति । अयच्छन्न् । तस्मात् ।
अपीति । वद्ध्यम् । प्रपन्नमिति प्र - पन्नम् । न । प्रति । प्रेति ।
यच्छन्ति । तस्मात् । द्विदेवत्येभ्य इति द्वि - देवत्येभ्यः । आदित्यः ।

निरिति । गृह्यते । यत् । उच्छेषणादित्युत् – शेषणात् । अजायन्त । तस्मात् । उच्छेषणादित्युत् – शेषणात् । गृह्यते । तिसृभिरिति तिसृ – भिः । ऋग्भिरित्यृक् – भिः । गृह्णाति । माता । पिता । पुत्रः । तत् । एव । तत् । मिथुनम् । उल्बम् । गर्भः । जरायु । तत् । एव । तत् । **20 (50)**

**TS 6.5.6.4**

मिथुनं पशवो वा एते यदादित्य ऊर्गदधि दद्ध्ना मद्ध्यतः श्रीणात्यूर्जमेव पशूनां मद्ध्यतो दधाति शृतातङ्क्येन मेद्ध्यत्वाय तस्मादामा पक्वं दुहे पशवो वा एते यदादित्यः परिश्रित्य गृह्णाति प्रतिरुद्ध्यैवास्मै पशून् गृह्णाति पशवो वा एते यदादित्य एष रुद्रो यदग्निः परिश्रित्य गृह्णाति रुद्रादेव पशूनन्तर्दधा– [ ] **21**

**TS 6.5.6.4 - Padam**

मिथुनम् । पशवः । वै । एते । यत् । आदित्यः । ऊर्क् । दधि । दद्ध्ना । मद्ध्यतः । श्रीणाति । ऊर्जम् । एव । पशूनाम् । मद्ध्यतः । दधाति । शृतातङ्क्येनेति शृत – आतङ्क्येन । मेद्ध्यत्वायेति मेद्ध्य – त्वाय । तस्मात् । आमा । पक्वम् । दुहे । पशवः । वै ।

एते । यत् । आदित्यः । परिश्रित्येति परि – श्रित्य । गृह्णाति ।
प्रतिरुद्ध्येति प्रति – रुद्ध्य । एव । अस्मै । पशून् । गृह्णाति ।
पशवः । वै । एते । यत् । आदित्यः । एषः । रुद्रः । यत् । अग्निः ।
परिश्रित्येति परि – श्रित्य । गृह्णाति । रुद्रात् । एव । पशून् । अन्तः ।
दधाति । **21 (50)**

**TS 6.5.6.5**

–त्येष वै विवस्वानादित्यो यदुपा॰शुसवनः स एतमेव सोमपीथं
परि शय आ तृतीयसवनाद्–विवस्व आदित्यैष ते सोमपीथ इत्याह
विवस्वन्तमेवाऽऽदित्य॰ सोमपीथेन स–मर्द्धयति या दिव्या
वृष्टिस्तया त्वा श्रीणामीति वृष्टिकामस्य श्रीणीयाद्–वृष्टिमेवाव रुन्धे
यदि ताजक् प्रस्कन्देद्–वर्.षुकः पर्जन्यः स्याद्–यदि चिर–
मवर्.षुको न ( ) सादयत्यसन्नाद्धि प्रजाः प्रजायन्ते नानु वषट्
करोति यदनुवषट्कुर्याद्–रुद्रं प्रजा अन्ववसृजेन्न हुत्वा ऽन्वीक्षेत
यदन्वीक्षेत चक्षुरस्य प्रमायुक॰ स्यात् तस्मान्नान्वीक्ष्यः ॥ **22**

**TS 6.5.6.5 - Padam**

एषः । वै । विवस्वान् । आदित्यः । यत् ।

उपाꣳशुसवन इत्युपाꣳशु – सवनः । सः । एतम् । एव ।

सोमपीथमिति सोम – पीथम् । परीति । शये । एति ।

तृतीयसवनादिति तृतीय–सवनात् । विवस्वः । आदित्य । एषः । ते ।

सोमपीथ इति सोम – पीथः । इति । आह । विवस्वन्तम् । एव ।

आदित्यम् । सोमपीथेनेति सोम – पीथेन । समिति । अर्द्धयति ।

या । दिव्या । वृष्टिः । तया । त्वा । श्रीणामि । इति । वृष्टिकामस्येति

वृष्टि – कामस्य । श्रीणीयात् । वृष्टिम् । एव । अवेति । रुन्धे ।

यदि । ताजक् । प्रस्कन्देदिति प्र – स्कन्देत् । वर्.षुकः । पर्जन्यः ।

स्यात् । यदि । चिरम् । अवर्.षुकः । न ( ) । सादयति । असन्नात् ।

हि । प्रजा इति प्र – जाः । प्रजायन्त इति

प्र – जायन्ते । न । अन्विति । वषट् । करोति । यत् ।

अनुवषट्कुर्यादित्यनु – वषट्कुर्यात् । रुद्रम् । प्रजा इति प्र – जाः ।

अन्ववसृजेदित्यनु – अवसृजेत् । न । हुत्वा । अन्विति । ईक्षेत ।

यत् । अन्वीक्षेतेत्यनु – ईक्षेत । चक्षुः । अस्य ।
प्रमायुकमिति प्र – मायुकम् । स्यात् । तस्मात् । न ।
अन्वीक्ष्य इत्यनु – ईक्ष्यः ॥ **22 (77)** ***(एव – यज्ञा – ज्जरायु तदेव तद – न्तर्दधाति – न – सप्तविꣳशतिश्च) (A6)***

**TS 6.5.7.1**

अन्तर्यामपात्रेण सावित्रमाग्रयणाद्–गृह्णाति प्रजापतिर्वा एष यदाग्रयणः प्रजानां प्रजननाय न सादयत्यसन्नाद्धि प्रजाः प्रजायन्ते नानु वषट् करोति यदनुवषट्कुर्याद्–रुद्रं प्रजा अन्ववसृजेदेष वै गायत्रो देवानां ँयथ् सवितैष गायत्रियै लोके गृह्यते यदाग्रयणो यदन्तर्यामपात्रेण सावित्रमाग्रयणाद्–गृह्णाति स्वादेवैनं ँयोनेर्निर्गृह्णाति विश्वे– [ ] **23**

**TS 6.5.7.1 - Padam**

अन्तर्यामपात्रेणेत्यन्तर्याम – पात्रेण । सावित्रम् । आग्रयणात् ।
गृह्णाति । प्रजापतिरिति प्रजा–पतिः । वै । एषः । यत् । आग्रयणः ।
प्रजानामिति प्र – जानाम् । प्रजननायेति प्र – जननाय । न ।

सादयति । असन्नात् । हि । प्रजा इति प्र – जाः । प्रजायन्त इति प्र – जायन्ते । न । अन्विति । वषट् । करोति । यत् । अनुवषट्कुर्यादित्यनु – वषट्कुर्यात् । रुद्रम् । प्रजा इति प्र – जाः । अन्ववसृजेदित्यनु – अवसृजेत् । एषः । वै । गायत्रः । देवानाम् । यत् । सविता । एषः । गायत्रियै । लोके । गृह्यते । यत् । आग्रयणः । यत् । अन्तर्यामपात्रेणेत्यन्तर्याम – पात्रेण । सावित्रम् । आग्रयणात् । गृह्णाति । स्वात् । एव । एनम् । योनेः । निरिति । गृह्णाति । विश्वे । **23 (50)**

**TS 6.5.7.2**

देवास्तृतीयꣳ सवनं नोदयच्छन् ते सवितारं प्रातस्सवनभागꣳ सन्तं तृतीयसवनमभि पर्यणयन् ततो वै ते तृतीयꣳ सवनमुदयच्छन्. यत् तृतीयसवने सावित्रो गृह्यते तृतीयस्य सवनस्योद्यत्यै सवितृपात्रेण वैश्वदेवं कलशाद्–गृह्णाति वैश्वदेव्यो वै प्रजा वैश्वदेवः कलशः सविता प्रसवानामीशे यथ् सवितृपात्रेण वैश्वदेवं कलशाद्–गृह्णाति सवितृप्रसूत एवास्मै प्रजाः प्र– [ ] **24**

**TS 6.5.7.2 - Padam**

देवाः । तृतीयम् । सवनम् । न । उदिति । अयच्छन्न् । ते । सवितारम् ।
प्रातस्सवनभागमिति प्रातस्सवन – भागम् । सन्तम् ।
तृतीयसवनमिति तृतीय–सवनम् । अभि । परीति । अनयन्न् । ततः ।
वै । ते । तृतीयम् । सवनम् । उदिति । अयच्छन्न् । यत् ।
तृतीयसवन इति तृतीय – सवने । सावित्रः । गृह्यते । तृतीयस्य ।
सवनस्य । उद्यत्या इत्युत् – यत्यै । सवितृपात्रेणेति सवितृ–पात्रेण ।
वैश्वदेवमिति वैश्व – देवम् । कलशात् । गृह्णाति । वैश्वदेव्य इति
वैश्व – देव्यः । वै । प्रजा इति प्र–जाः । वैश्वदेव इति वैश्व–देवः ।
कलशः । सविता । प्रसवानामिति प्र – सवानाम् । ईशे । यत् ।
सवितृपात्रेणेति सवितृ – पात्रेण । वैश्वदेवमिति वैश्व – देवम् ।
कलशात् । गृह्णाति । सवितृप्रसूत इति सवितृ – प्रसूतः । एव ।
अस्मै । प्रजा इति प्र – जाः । प्रेति । **24 (50)**

**TS 6.5.7.3**

जनयति सोमे सोममभि गृह्णाति रेत एव तद्–दधाति सुशर्मा ऽसि सुप्रतिष्ठान इत्याह सोमे हि सोम–मभिगृह्णाति प्रतिष्ठित्या एतस्मिन् वा अपि ग्रहे मनुष्येभ्यो देवेभ्यः पितृभ्यः क्रियते सुशर्मा ऽसि सुप्रतिष्ठान इत्याह मनुष्येभ्य एवैतेन करोति बृहदित्याह देवेभ्य एवैतेन करोति नम इत्याह पितृभ्य एवैतेन करोत्ये ( ) तावती वै देवतास्ताभ्य एवैनꣳ सर्वाभ्यो गृह्णात्येष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इत्याह वैश्वदेवो ह्येषः ॥ 25

**TS 6.5.7.3 - Padam**

जनयति । सोमे । सोमम् । अभीति । गृह्णाति । रेतः । एव । तत् । दधाति । सुशर्मेति सु – शर्मा । असि । सुप्रतिष्ठान इति सु – प्रतिष्ठानः । इति । आह । सोमे । हि । सोमम् । अभिगृह्णातीत्यभि – गृह्णाति । प्रतिष्ठित्या इति प्रति – स्थित्यै । एतस्मिन्न् । वै । अपीति । ग्रहे । मनुष्येभ्यः । देवेभ्यः । पितृभ्य इति पितृ – भ्यः । क्रियते । सुशर्मेति सु – शर्मा । असि । सुप्रतिष्ठान इति सु – प्रतिष्ठानः । इति । आह । मनुष्येभ्यः । एव ।

एतेन । करोति । बृहत् । इति । आह । देवेभ्यः । एव । एतेन । करोति । नमः । इति । आह । पितृभ्य इति पितृ – भ्यः । एव । एतेन । करोति ( ) । एतावतीः । वै । देवताः । ताभ्यः । एव । एनम् । सर्वाभ्यः । गृह्णाति । एषः । ते । योनिः । विश्वेभ्यः । त्वा । देवेभ्यः । इति । आह । वैश्वदेव इति वैश्व – देवः । हि । एषः ॥ **25 (69)**

***(विश्वे – प्र – पितृभ्य एवैतेन करोत्ये – कान्नविꣳशतिश्च) (A7)***

**<u>TS 6.5.8.1</u>**

प्राणो वा एष यदुपाꣳशु–र्यदुपाꣳशुपात्रेण प्रथमश्चोत्तमश्च ग्रहौ गृह्येते प्राणमेवानु प्रयन्ति प्राणमनूद्–यन्ति प्रजापतिर्वा एष यदाग्रयणः प्राण उपाꣳशुः पत्नीः प्रजाः प्र जनयन्ति यदुपाꣳशुपात्रेण पात्नीवतमाग्रयणाद्–गृह्णाति प्रजानां प्रजननाय तस्मात् प्राणं प्रजा अनु प्र जायन्ते देवा वा इतइतः पत्नीः सुवर्ग– [ ] **26**

**TS 6.5.8.1 - Padam**

प्राण इति प्र – अनः । वै । एषः । यत् । उपाꣳशुरित्युप–अꣳशुः ।

यत् । उपाꣳशुपात्रेणेत्युपाꣳशु – पात्रेण । प्रथमः । च । उत्तम

इत्युत् – तमः । च । ग्रहौ । गृह्येते इति । प्राणमिति प्र – अनम् ।

एव । अन्विति । प्रयन्तीति प्र – यन्ति । प्राणमिति प्र – अनम् ।

अनु । उदिति । यन्ति । प्रजापतिरिति प्रजा – पतिः । वै । एषः ।

यत् । आग्रयणः । प्राण इति प्र – अनः । उपाꣳशुरित्युप–अꣳशुः ।

पत्नीः । प्रजा इति प्र – जाः । प्रेति । जनयन्ति । यत् ।

उपाꣳशुपात्रेणेत्युपाꣳशु – पात्रेण । पात्नीवतमिति पात्नी – वतम् ।

आग्रयणात् । गृह्णाति । प्रजानामिति प्र – जानाम् ।

प्रजननायेति प्र – जननाय । तस्मात् । प्राणमिति प्र – अनम् ।

प्रजा इति प्र–जाः । अनु । प्रेति । जायन्ते । देवाः । वै ।

इत इत इतीतः – इतः । पत्नीः । सुवर्गमिति सुवः–गम् । **26 (50)**

**TS 6.5.8.2**

ँलोकमजिगाꣳसन् ते सुवर्गं ँलोकं न प्राजानन् त एतं

पात्नीवतमपश्यन् तमगृह्णत ततो वै ते सुवर्गं ँलोकं प्राजानन्. यत्

पात्नीवतो गृह्यते सुवर्गस्य लोकस्य प्रज्ञात्यै स सोमो नातिष्ठत स्त्रीभ्यो गृह्यमाणस्तं घृतं वज्रं कृत्वाऽघ्नन् तं निरिन्द्रियं भूतमगृह्णन् तस्मात् स्त्रियो निरिन्द्रिया अदायादीरपि पापात् पुꣳस उपस्तितरं– [ ] **27**

**TS 6.5.8.2 - Padam**

लोकम् । अजिगाꣳसन्न् । ते । सुवर्गमिति सुवः – गम् । लोकम् । न । प्रेति । अजानन्न् । ते । एतम् । पात्नीवतमिति पात्नी – वतम् । अपश्यन्न् । तम् । अगृह्णत । ततः । वै । ते । सुवर्गमिति सुवः – गम् । लोकम् । प्रेति । अजानन्न् । यत् । पात्नीवत इति पात्नी – वतः । गृह्यते । सुवर्गसेति सुवः – गस्य । लोकस्य । प्रज्ञात्या इति प्र – ज्ञात्यै । सः । सोमः । न । अतिष्ठत । स्त्रीभ्यः । गृह्यमाणः । तम् । घृतम् । वज्रम् । कृत्वा । अघ्नन्न् । तम् । निरिन्द्रियमिति निः – इन्द्रियम् । भूतम् । अगृह्णन्न् । तस्मात् । स्त्रियः । निरिन्द्रिया इति निः–इन्द्रियाः । अदायादीरित्यदाय–अदीः । अपीति । पापात् । पुꣳसः । उपस्तितरमित्युपस्ति – तरम् । **27 (50)**

**TS 6.5.8.3**

वँदन्ति यद्–घृतेन पात्नीवत७ श्रीणाति वज्रेणैवैनं वँशे कृत्वा गृह्णा–त्युपयामगृहीतोऽसीत्याहेयं वँा उपयामस्तस्मादिमां प्रजा अनु प्र जायन्ते बृहस्पतिसुतस्य त इत्याह ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवास्मै प्रजाः प्र जनयतीन्दो इत्याह रेतो वा **इन्दू** रेत एव तद्–दधातीन्द्रियाव इ– [ ] **28**

**TS 6.5.8.3 - Padam**

वदन्ति । यत् । घृतेन । पात्नीवतमिति पात्नी – वतम् । श्रीणाति । वज्रेण । एव । एनम् । वशे । कृत्वा । गृह्णाति । उपयामगृहीत इत्युपयाम – गृहीतः । असि । इति । आह । इयम् । वै । उपयाम इत्युप – यामः । तस्मात् । इमाम् । प्रजा इति प्र – जाः । अनु । प्रेति । जायन्ते । बृहस्पतिसुतस्येति बृहस्पति–सुतस्य । ते । इति । आह । ब्रह्म । वै । देवानाम् । बृहस्पतिः । ब्रह्मणा । एव । अस्मै । प्रजा इति प्र – जाः । प्रेति । जनयति । इन्दो इति । इति । आह । रेतः । वै । इन्दुः । रेतः । एव । तत् । दधाति । इन्द्रियाव इतीन्द्रिय – वः । इति । **28 (50)**

**TS 6.5.8.4**

–त्याह प्रजा वा इन्द्रियं प्रजा एवास्मै प्र जनयत्यग्ना(3)

इत्याहाग्निर्वै रेतोधाः पत्नीव इत्याह मिथुनत्वाय सजूर्देवेन त्वष्ट्रा

सोमं पिबेत्याह त्वष्टा वै पशूनां मिथुनानाꣳ रूपकृद्–रूप–मेव

पशुषु दधाति देवा वै त्वष्टार–मजिघाꣳसन्थ् स पत्नीः प्रापद्यत तं न

प्रति प्रायच्छन् तस्मादपि– [ ] **29**

**TS 6.5.8.4 - Padam**

आह । प्रजा इति प्र – जाः । वै । इन्द्रियम् । प्रजा इति प्र–जाः ।

एव । अस्मै । प्रेति । जनयति । अग्ना(3) इ । इति । आह । अग्निः ।

वै । रेतोधा इति रेतः – धाः । पत्नीव इति पत्नी – वः । इति । आह ।

मिथुनत्वायेति मिथुन–त्वाय । सजूरिति स – जूः । देवेन । त्वष्ट्रा ।

सोमम् । पिब । इति । आह । त्वष्टा । वै । पशूनाम् । मिथुनानाम् ।

रूपकृदिति रूप – कृत् । रूपम् । एव । पशुषु । दधाति । देवाः ।

वै । त्वष्टारम् । अजिघाꣳसन्न् । सः । पत्नीः । प्रेति । अपद्यत । तम् ।

न । प्रति । प्रेति । अयच्छन्न् । तस्मात् । अपीति । **29 (50)**

**TS 6.5.8.5**

वद्ध्यं प्रपन्नं न प्रति प्र यच्छन्ति तस्मात् पात्नीवते त्वष्ट्रे ऽपि गृह्यते न सादयत्यसन्नाद्धि प्रजाः प्रजायन्ते नानु वषट् करोति यदनुवषट्कुर्याद्-रुद्रं प्रजा अन्ववसृजेद्-यन्नानुवषट्कुर्या-दशान्त-मग्नीथ् सोमं भक्षयेदुपा॑श्वनु वषट् करोति न रुद्रं प्रजा अन्ववसृजति शान्तमग्नीथ् सोमं भक्षयत्यग्नी-न्नेष्टु-रुपस्थमा सीद- [ ] **30**

**TS 6.5.8.5 - Padam**

वद्ध्यम् । प्रपन्नमिति प्र - पन्नम् । न । प्रति । प्रेति । यच्छन्ति । तस्मात् । पात्नीवत इति पात्नी - वते । त्वष्ट्रे । अपीति । गृह्यते । न । सादयति । असन्नात् । हि । प्रजा इति प्र - जाः । प्रजायन्त इति प्र - जायन्ते । न । अन्विति । वषट् । करोति । यत् । अनुवषट्कुर्यादित्यनु - वषट्कुर्यात् । रुद्रम् । प्रजा इति प्र - जाः । अन्ववसृजेदित्यनु - अवसृजेत् । यत् । न । अनुवषट्कुर्यादित्यनु-वषट्कुर्यात् । अशान्तम् । अग्नीदित्यग्नि-इत् । सोमम् । भक्षयेत् । उपा॑श्वित्युप - अ॒ꣳशु । अन्विति । वषट् ।

करोति । न । रुद्रम् । प्रजा इति प्र – जाः ।
अन्ववसृजतीत्यनु – अवसृजति । शान्तम् ।
अग्नीदित्यग्नि – इत् । सोमम् । भक्षयति । अग्नीदित्यग्नि – इत् ।
नेष्टुः । उपस्थमित्युप – स्थम् । एति । सीद । **30 (50)**

**<u>TS 6.5.8.6</u>**

नेष्टः पत्नी–मुदानयेत्याहा–ग्नीदेव नेष्टरि रेतो दधाति नेष्टा पत्निया–मुद्गात्रा सं ख्यापयति प्रजापतिर्वा एष यदुद्गाता प्रजानां प्रजननायाप उप प्र वर्तयति रेत एव तथ् सिञ्चत्यूरुणोप प्र वर्तयत्यूरुणा हि रेतः सिच्यते नग्नंकृत्यो–रु–मुप प्र वर्तयति यदा हि नग्न ऊरुर्भवत्यथ मिथुनी ( ) भवतोऽथ रेतः सिच्यते ऽथ प्रजाः प्र जायन्ते ॥ **31**

**<u>TS 6.5.8.6 - Padam</u>**

नेष्टः । पत्नीम् । उदानयेत्युत् – आनय । इति । आह ।
अग्नीदित्यग्नि–इत् । एव । नेष्टरि । रेतः । दधाति । नेष्टा । पत्नियाम् ।
उद्गात्रेत्युत्–गात्रा । समिति । ख्यापयति । प्रजापतिरिति प्रजा–पतिः ।

वै । एषः । यत् । उद्गातेत्युत् – गाता । प्रजानामिति प्र – जानाम् । प्रजननायेति प्र – जननाय । अपः । उप । प्रेति । वर्तयति । रेतः । एव । तत् । सिञ्चति । ऊरुणा । उप । प्रेति । वर्तयति । ऊरुणा । हि । रेतः । सिच्यते । नग्नङ्कृत्येति नग्नम् – कृत्य । ऊरुम् । उप । प्रेति । वर्तयति । यदा । हि । नग्नः । ऊरुः । भवति । अथ । मिथुनी ( ) । भवतः । अथ । रेतः । सिच्यते । अथ । प्रजा इति प्र – जाः । प्रेति । जायन्ते ॥ **31 (58)** *(पत्नीः सुवर्ग – मुपस्तितर – मिन्द्रियाव इत्य – पि – सीद – मिथुन्य – ष्टौ च) (A8)*

**TS 6.5.9.1**

इन्द्रो वृत्रमहन् तस्य शीर्.षकपाल–मुदौब्जथ् स द्रोणकलशो ऽभवत् तस्माथ् सोमः समस्रवथ् स हारियोजनो ऽभवत् तं ँव्यचिकिथ्स–ज्जुहवानी(3) मा हौषा(3)मिति सो ऽमन्यत यद्धोष्याम्यामꣳ होष्यामि यन्न होष्यामि यज्ञवेशसं करिष्यामीति तमद्ध्रियत होतुꣳ सो ऽग्नि–रब्रवीन्न मय्यामꣳ होष्यसीति तं धानाभि–रश्रीणात्–[ ] **32**

**TS 6.5.9.1 - Padam**

इन्द्रः । वृत्रम् । अहन्न् । तस्य । शीर्.षकपालमिति शीर्.ष–कपालम् ।
उदिति । औब्जत् । सः । द्रोणकलश इति द्रोण–कलशः । अभवत् ।
तस्मात् । सोमः । समिति । अस्रवत् । सः । हारियोजन इति
हारि – योजनः । अभवत् । तम् । वीति । अचिकित्सत् ।
जुहवानी(3) । मा । हौषा(3)म् । इति । सः । अमन्यत । यत् ।
होष्यामि । आमम् । होष्यामि । यत् । न । होष्यामि । यज्ञवेशसमिति
यज्ञ – वेशसम् । करिष्यामि । इति । तम् । अद्ध्रियत । होतुम् ।
सः । अग्निः । अब्रवीत् । न । मयि । आमम् । होष्यसि । इति । तम् ।
धानाभिः । अश्रीणात् । **32 (50)**

**TS 6.5.9.2**

तꣳ शृतं भूतमजुहोद्–यद्–धानाभिर्. हारियोजनꣳ श्रीणाति शृतत्वाय
शृतमेवैनं भूतं जुहोति बह्वीभिः श्रीणात्येतावती–रेवास्या–मुष्मिन्
ँल्लोके कामदुघा भवन्त्यथो खल्वाहुरेता वा इन्द्रस्य पृश्ञयः
कामदुघा यद्धारियोजनीरिति तस्माद्–बह्वीभिः श्रीणीयादृख्सामे वा

इन्द्रस्य हरी सोमपानौ तयोः परिधय आधानं ँयदप्रहृत्य परिधी–

ञ्जुहुया–दन्तराधानाभ्यां– [ ] **33**

**TS 6.5.9.2 - Padam**

तम् । शृतम् । भूतम् । अजुहोत् । यत् । धानाभिः ।

हारियोजनमिति हारि – योजनम् । श्रीणाति । शृतत्वायेति

शृत – त्वाय । शृतम् । एव । एनम् । भूतम् । जुहोति । बह्वीभिः ।

श्रीणाति । एतावतीः । एव । अस्य । अमुष्मिन्न् । लोके । कामदुघा

इति काम – दुघाः । भवन्ति । अथो इति । खलु । आहुः । एताः ।

वै । इन्द्रस्य । पृश्ञयः । कामदुघा इति काम – दुघाः । यत् ।

हारियोजनीरिति हारि – योजनीः । इति । तस्मात् । बह्वीभिः ।

श्रीणीयात् । ऋख्सामे इत्यृक् – सामे । वै । इन्द्रस्य । हरी इति ।

सोमपानाविति सोम – पानौ । तयोः । परिधय इति परि – धयः ।

आधानमित्या – धानम् । यत् । अप्रहृत्येत्यप्र – हृत्य ।

परिधीनिति परि – धीन् । जुहुयात् ।

अन्तराधानाभ्यामित्यन्तः–आधानाभ्याम् । **33 (50)**

**TS 6.5.9.3**

घासं प्र यच्छेत् प्रहृत्य परिधीञ्जुहोति निराधानाभ्यामेव घासं प्र यच्छत्युन्नेता जुहोति यातयामेव ह्येतर्ह्यद्ध्वर्युः स्वगाकृतो यदद्ध्वर्युर्जुहुयाद्–यथा विमुक्तं पुनर्युनक्ति तादृगेव तच्छीर्.ष–न्नधिनिधाय जुहोति शीर्.षतो हि स समभवद्–विक्रम्य जुहोति विक्रम्य हीन्द्रो वृत्रमहन्थ् समृद्ध्यै पशवो वै हारियोजनीर्यथ् संभिन्द्यादल्पा– [ ] **34**

**TS 6.5.9.3 - Padam**

घासम् । प्रेति । यच्छेत् । प्रहृत्येति प्र – हृत्य । परिधीनिति परि – धीन् । जुहोति । निराधानाभ्यामिति निः – आधानाभ्याम् । एव । घासम् । प्रेति । यच्छति । उन्नेतेत्युत् – नेता । जुहोति । यातयामेति यात – यामा । इव । हि । एतर्.हि । अद्ध्वर्युः । स्वगाकृत इति स्वगा–कृतः । यत् । अद्ध्वर्युः । जुहुयात् । यथा । विमुक्तमिति वि – मुक्तम् । पुनः । युनक्ति । तादृक् । एव । तत् । शीर्.षन्न् । अधिनिधायेत्यधि – निधाय । जुहोति । शीर्.षतः । हि ।

सः । समभवदिति सं – अभवत् । विक्रम्येति वि–क्रम्य । जुहोति ।
विक्रम्येति वि – क्रम्य । हि । इन्द्रः । वृत्रम् । अहन्न् । समृद्ध्या
इति सम्–ऋद्ध्यै । पशवः । वै । हारियोजनीरिति हारि–योजनीः ।
यत् । संभिन्द्यादिति सं – भिन्द्यात् । अल्पाः । **34 (50)**

**<u>TS 6.5.9.4</u>**

एनं पशवो भुञ्जन्त उप तिष्ठेरन्. यन्न संभिन्द्याद्–बहव एनं
पशवो ऽभुञ्जन्त उप तिष्ठेरन् मनसा सं बाधत उभयं करोति बहव
एवैनं पशवो भुञ्जन्त उप तिष्ठन्त उन्नेतर्युपहव–मिच्छन्ते य एव
तत्र सोमपीथस्तमेवाव रुन्धत उत्तरवेद्यां नि वपति पशवो वा उत्तरवेदिः
पशवो हारियोजनीः पशुष्वेव पशून् प्रति ष्ठापयन्ति ( ) ॥ **35**

**<u>TS 6.5.9.4 - Padam</u>**

एनम् । पशवः । भुञ्जन्तः । उपेति । तिष्ठेरन्न् । यत् । न ।
संभिन्द्यादिति सं – भिन्द्यात् । बहवः । एनम् । पशवः ।
अभुञ्जन्तः । उपेति । तिष्ठेरन्न् । मनसा । समिति । बाधते ।
उभयम् । करोति । बहवः । एव । एनम् । पशवः । भुञ्जन्तः ।
उपेति । तिष्ठन्ते । उन्नेतरीत्युत् – नेतरि । उपहवमित्युप – हवम् ।

इच्छन्ते । यः । एव । तत्र । सोमपीथ इति सोम – पीथः । तम् ।
एव । अवेति । रुन्धते । उत्तरवेद्यामित्युत्तर – वेद्याम् । नीति ।
वपति । पशवः । वै । उत्तरवेदिरित्युत्तर – वेदिः । पशवः ।
हारियोजनीरिति हारि – योजनीः । पशुषु । एव । पशून् । प्रतीति ।
स्थापयन्ति ( ) ॥ **35 (50)**

*(अश्रीणा – दन्तराधानाभ्या – मल्पाः – स्थापयन्ति) (A9)*

**TS 6.5.10.1**

ग्रहान्. वा अनु प्रजाः पशवः प्र जायन्त उपाꣳश्वन्तर्या–मावजावयः
शुक्रामन्थिनौ पुरुषा ऋतुग्रहा–नेकशफा आदित्यग्रहं गाव
आदित्यग्रहो भूयिष्ठाभिर्. ऋग्भिर्गृह्यते तस्माद्–गावः पशूनां भूयिष्ठा
यत् त्रि–रुपाꣳशुꣳ हस्तेन विगृह्णाति तस्माद् द्वौ त्रीनजा
जनयत्यथावयो भूयसीः पिता वा एष यदाग्रयणः पुत्रः कलशो
यदाग्रयण उपदस्येत् कलशाद्–गृह्णीयाद्–यथा पिता– [ ] **36**

**TS 6.5.10.1 - Padam**

ग्रहान् । वै । अन्विति । प्रजा इति प्र – जाः । पशवः । प्रेति ।

जायन्ते । उपा॒ꣳश्वन्तर्यामावित्युपा॒ꣳशु – अन्तर्यामौ । अजावय

इत्यजा – अवयः । शुक्रामन्थिनाविति शुक्रा – मन्थिनौ । पुरुषाः ।

ऋतुग्रहानित्यृतु – ग्रहान् । एकशफा इत्येक – शफाः ।

आदित्यग्रहमित्यादित्य – ग्रहम् । गावः । आदित्यग्रह

इत्यादित्य – ग्रहः । भूयिष्ठाभिः । ऋग्भिरित्यृक्–भिः । गृह्यते ।

तस्मात् । गावः । पशूनाम् । भूयिष्ठाः । यत् । त्रिः ।

उपा॒ꣳशुमित्युप – अ॒ꣳशुम् । हस्तेन । विगृह्णातीति वि – गृह्णाति ।

तस्मात् । द्वौ । त्रीन् । अजा । जनयति । अथ । अवयः । भूयसीः ।

पिता । वै । एषः । यत् । आग्रयणः । पुत्रः । कलशः । यत् ।

आग्रयणः । उपदस्येदित्युप – दस्येत् । कलशात् । गृह्णीयात् ।

यथा । पिता । **36 (50)**

**TS 6.5.10.2**

पुत्रं क्षित उपधावति तादृगेव तद्–यत् कलश उपदस्ये–दाग्रयणाद्–

गृह्णीयाद्–यथा पुत्रः पितरं क्षित उपधावति तादृगेव तदात्मा वा

एष यज्ञस्य यदाग्रयणो यद्-ग्रहो वा कलशो वोपदस्ये-दाग्रयणाद्-
गृह्णीयादात्मन एवाधि यज्ञं निष्करोत्यविज्ञातो वा एष गृह्यते
यदाग्रयणः स्थाल्या गृह्णाति वायव्येन जुहोति तस्माद्- [ ] 37

**TS 6.5.10.2 - Padam**

पुत्रम् । क्षितः । उपधावतीत्युप-धावति । तादृक् । एव । तत् । यत् ।
कलशः । उपदस्येदित्युप-दस्येत् । आग्रयणात् । गृह्णीयात् । यथा ।
पुत्रः । पितरम् । क्षितः । उपधावतीत्युप - धावति । तादृक् । एव ।
तत् । आत्मा । वै । एषः । यज्ञस्य । यत् । आग्रयणः । यत् । ग्रहः ।
वा । कलशः । वा । उपदस्येदित्युप - दस्येत् । आग्रयणात् ।
गृह्णीयात् । आत्मनः । एव । अधीति । यज्ञम् । निरिति । करोति ।
अविज्ञात इत्यवि - ज्ञातः । वै । एषः । गृह्यते । यत् । आग्रयणः ।
स्थाल्या । गृह्णाति । वायव्येन । जुहोति । तस्मात् । **37 (50)**

**TS 6.5.10.3**

गर्भेणाविज्ञातेन ब्रह्महा ऽवभृथमव यन्ति परा स्थालीरस्यन्त्युद्-
वायव्यानि हरन्ति तस्माथ् स्त्रियं जातां परा ऽस्यन्त्युत् पुमाꣳसꣳ

हरन्ति यत् पुरोरुचमाह यथा वस्यस आहरति तादृगेव तद्–यद्–ग्रहं गृह्णाति यथा वस्यस आहृत्य प्राऽऽह तादृगेव तद्–यथ् सादयति यथा वस्यस उपनिधाया–पक्रामति तादृगेव तद् यद् ( ) वै यज्ञस्य साम्ना यजुषा क्रियते शिथिलं तद्–यदृचा तद् दृढं पुरस्तादुपयामा यजुषा गृह्यन्त उपरिष्टा–दुपयामा ऋचा यज्ञस्य धृत्यै ॥ **38**

**TS 6.5.10.3 - Padam**

गर्भेण । अविज्ञातेनेत्यवि – ज्ञातेन । ब्रह्महेति ब्रह्म – हा । अवभृथमित्यव – भृथम् । अवेति । यन्ति । परेति । स्थालीः । अस्यन्ति । उदिति । वायव्यानि । हरन्ति । तस्मात् । स्त्रियम् । जाताम् । परेति । अस्यन्ति । उदिति । पुमाꣳसम् । हरन्ति । यत् । पुरोरुचमिति पुरः – रुचम् । आह । यथा । वस्यसे । आहरतीत्या–हरति । तादृक् । एव । तत् । यत् । ग्रहम् । गृह्णाति । यथा । वस्यसे । आहृत्येत्या – हृत्य । प्रेति । आह । तादृक् । एव । तत् । यत् । सादयति । यथा । वस्यसे । उपनिधायेत्युप – निधाय । अपक्रामतीत्यप – क्रामति । तादृक् । एव । तत् । यत् ( ) । वै ।

यज्ञस्य । साम्ना । यजुषा । क्रियते । शिथिलम् । तत् । यत् ।

ऋचा । तत् । दृढम् । पुरस्तादुपयामा इति पुरस्तात् – उपयामाः ।

यजुषा । गृह्यन्ते । उपरिष्टादुपयामा इत्युपरिष्टात् – उपयामाः ।

ऋचा । यज्ञस्य । धृत्यै ॥ **38 (68)**

*(यथा पिता – तस्मा – दपक्रामति तादृगेव तद् य – दष्टादश च)*

*(A10)*

**<u>TS 6.5.11.1</u>**

प्रान्यानि पात्राणि युज्यन्ते नान्यानि यानि पराचीनानि प्रयुज्यन्ते ऽमुमेव तैर्लोकमभि जयति पराङिव ह्यसौ लोको यानि पुनःप्रयुज्यन्त इममेव तैर्लोकमभि जयति पुनः पुनरिव ह्ययं ँल्लोकः प्रान्यानि पात्राणि युज्यन्ते नान्यानि यानि पराचीनानि प्रयुज्यन्ते तान्यन्वोषधयः परा भवन्ति यानि पुनः– [ ] **39**

**<u>TS 6.5.11.1 - Padam</u>**

प्रेति । अन्यानि । पात्राणि । युज्यन्ते । न । अन्यानि । यानि ।

पराचीनानि । प्रयुज्यन्त इति प्र – युज्यन्ते । अमुम् । एव । तैः ।

लोकम् । अभीति । जयति । पराङ् । इव । हि । असौ । लोकः ।

यानि । पुनः । प्रयुज्यन्त इति प्र – युज्यन्ते । इमम् । एव ।
तैः । लोकम् । अभीति । जयति । पुनःपुनरिति पुनः – पुनः ।
इव । हि । अयम् । लोकः । प्रेति । अन्यानि । पात्राणि ।
युज्यन्ते । न । अन्यानि । यानि । पराचीनानि । प्रयुज्यन्त इति
प्र – युज्यन्ते । तानि । अन्विति । ओषधयः । परेति ।
भवन्ति । यानि । पुनः । **39 (50)**

**TS 6.5.11.2**

प्रयुज्यन्ते तान्यन्वोषधयः पुनरा भवन्ति प्रान्यानि पात्राणि युज्यन्ते
नान्यानि यानि पराचीनानि प्रयुज्यन्ते तान्यन्वारण्याः पशवो ऽरण्यमप
यन्ति यानि पुनः प्रयुज्यन्ते तान्यनु ग्राम्याः पशवो ग्राममुपावयन्ति
यो वै ग्रहाणां निदानं ँवेद निदानवान् भवत्याज्यमित्युक्थं तद्–वै
ग्रहाणां निदानं ँयदुपा(ग्)शु श(ग्)सति त– [ ] **40**

**TS 6.5.11.2 - Padam**

प्रयुज्यन्त इति प्र – युज्यन्ते । तानि । अन्विति । ओषधयः । पुनः ।
एति । भवन्ति । प्रेति । अन्यानि । पात्राणि । युज्यन्ते । न ।
अन्यानि । यानि । पराचीनानि । प्रयुज्यन्त इति प्र–युज्यन्ते । तानि ।

अन्विति । आरण्याः । पशवः । अरण्यम् । अपेति । यन्ति । यानि ।
पुनः । प्रयुज्यन्त इति प्र – युज्यन्ते । तानि । अन्विति । ग्राम्याः ।
पशवः । ग्रामम् । उपावयन्तीत्युप–अवयन्ति । यः । वै । ग्रहाणाम् ।
निदानमिति नि – दानम् । वेद । निदानवानिति निदान – वान् ।
भवति । आज्यम् । इति । उक्थम् । तत् । वै । ग्रहाणाम् ।
निदानमिति नि – दानम् । यत् । उपाꣳश्वित्युप – अꣳशु ।
शꣳसति । तत् । **40 (50)**

**TS 6.5.11.3**

–दुपाꣳश्वन्तर्यामयो–र्यदुच्चै–स्तदितरेषां ग्रहाणामेतद्–वै ग्रहाणां
निदानं ँय एवं ँवेद निदानवान् भवति यो वै ग्रहाणां मिथुनं ँवेद
प्र प्रजया पशुभिर्मिथुनैर्जायते स्थालीभिरन्ये ग्रहा गृह्यन्ते वायव्यैरन्य
एतद्–वै ग्रहाणां मिथुनं ँय एवं ँवेद प्र प्रजया पशुभिर्मिथुनैर्जायत
इन्द्रस्त्वष्टुः सोममभीषहाऽपिबथ् स विष्वङ्– [ ] **41**

**TS 6.5.11.3 - Padam**

उपा॒ꣳशव॒न्त॒र्या॒मयो॒रित्यु॑पा॒ꣳशु – अ॒न्त॒र्या॒मयोः᳚ । यत् । उ॒च्चैः । तत् ।
इ॒तरे॑षाम् । ग्रहा॑णाम् । ए॒तत् । वै । ग्रहा॑णाम् । नि॒दा॒नमिति॑
नि – दा॒न᳚म् । यः । ए॒वम् । वेद॑ । नि॒दान॑वा॒निति॑ नि॒दान॑ – वा॒न् ।
भ॒व॒ति॒ । यः । वै । ग्रहा॑णाम् । मि॒थु॒नम् । वेद॑ । प्रेति॑ । प्र॒जये॑ति
प्र – जया᳚ । प॒शु॒भिरिति॑ प॒शु – भिः॒ । मि॒थु॒नैः । जा॒य॒ते॒ ।
स्था॒लीभि॑ । अ॒न्ये । ग्र॒हाः᳚ । गृ॒ह्यन्ते᳚ । वा॒य॒व्यैः᳚ । अ॒न्ये । ए॒तत् ।
वै । ग्रहा॑णाम् । मि॒थु॒नम् । यः । ए॒वम् । वेद॑ । प्रेति॑ । प्र॒जये॑ति
प्र – जया᳚ । प॒शु॒भिरिति॑ प॒शु – भिः॒ । मि॒थु॒नैः । जा॒य॒ते॒ । इन्द्रः॑ ।
त्वष्टुः॑ । सोम᳚म् । अ॒भी॒षहेत्य॑भि – सहा᳚ । अ॒पि॒ब॒त् । सः ।
विष्व॑ङ् । **41 (50)**

**TS 6.5.11.4**

व्या᳚र्च्छ॒थ् स आ॒त्मन्ना॒रम॑ण॒ं नावि॑न्द॒थ् स ए॒ताननु॑स॒वनं
पु॑रो॒डाशा॑नपश्य॒त् तान् निर॑व॒पत् तैर्वै स आ॒त्मन्ना॒रमण–मकुरुत॒
तस्मा॑दनुस॒वनं पु॑रो॒डाशा॒ निरुप्य॑न्ते॒ तस्मा॑दनुस॒वनं पु॑रो॒डाशा॑नां॒
प्रा॑श्ञीयादा॒त्म–न्ने॒वाऽऽर॑मणं कुरुते॒ नैन॒ꣳ॒ सोमो ऽति पवते

ब्रह्मवादिनो वदन्ति **नर्चा** न यजुषा पङ्क्तिराप्यतेऽथ किं ( ) यँज्ञस्य पाङ्क्त्वमिति धानाः करंभः परिवापः पुरोडाशः पयस्या तेन पङ्क्तिराप्यते तद्–यज्ञस्य पाङ्क्त्वं ॥ **42**

**TS 6.5.11.4 - Padam**

वीति । आर्च्छत् । सः । आत्मन्न् । आरमणमित्या – रमणम् । न । अविन्दत् । सः । एतान् । अनुसवनमित्यनु–सवनम् । पुरोडाशान् । अपश्यत् । तान् । निरिति । अवपत् । तैः । वै । सः । आत्मन्न् । आरमणमित्या – रमणम् । अकुरुत । तस्मात् । अनुसवनमित्यनु – सवनम् । पुरोडाशाः । निरिति । उप्यन्ते । तस्मात् । अनुसवनमित्यनु – सवनम् । पुरोडाशानाम् । प्रेति । अश्ञीयात् । आत्मन्न् । एव । आरमणमित्या – रमणम् । कुरुते । न । एनम् । सोमः । अतीति । पवते । ब्रह्मवादिन इति ब्रह्म – वादिनः । वदन्ति । न । ऋचा । न । यजुषा । पङ्क्तिः । आप्यते । अथ । किम् ( ) । यज्ञस्य । पाङ्क्त्वमिति पाङ्क्त – त्वम् । इति । धानाः । करम्भः ।

परिवाप इति परि – वापः । पुरोडाशः । पयस्या । तेन । पङ्क्तिः । आप्यते । तत् । यज्ञस्य । पाङ्क्तत्वमिति पाङ्क्त – त्वम् ॥ **42 (64)**

*(भवन्ति यानि पुनः – शꣳसति त – द्विष्वङ् – किं – चतुर्दश च)*
*(A11)*

=============

**Prasna Korvai with starting Padams of 1 to 11 Anuvaakams :-**

(इन्द्रो वृत्राया– ऽऽयुर्वै – यज्ञेन – सुवर्गा – येन्द्रो मरुद्भि – रदिति – रन्तर्यामपात्रेण – प्राण उपा॒ꣳशु पात्रे – णेन्द्रो वृत्रमहन् तस्य – ग्रहान् – प्रान्या – न्येकादश)

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(इन्द्रो वृत्राय – पुनर्. ऋतुनाऽऽह – मिथुनं पशवो – नेष्टः पत्नी – मुपा॒ꣳश्वन्तर्यामयो – द्विचत्वारि॒ꣳशत्)

**First and Last Padam of Fifth Prasnam of 6th Kandam**

(इन्द्रो वृत्राय – पाङ्क्त्वं)

॥ हरिः ओं ॥

**॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे षष्ठकाण्डे पञ्चमः प्रश्नः समाप्तः ॥**

**Details of Panchati and Padam for Kandam 6, Prasanam 5 (TS 6.5)**

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 5 | 233 |
| Anuvakam 2 | 3 | 139 |
| Anuvakam 3 | 4 | 184 |
| Anuvakam 4 | 2 | 80 |
| Anuvakam 5 | 3 | 178 |
| Anuvakam 6 | 5 | 277 |
| Anuvakam 7 | 3 | 169 |
| Anuvakam 8 | 6 | 308 |
| Anuvakam 9 | 4 | 200 |
| Anuvakam 10 | 3 | 168 |
| Anuvakam 11 | 4 | 214 |
| Total → | 42 | 2150 |

1. **Please refer to the book “TS Kandam 1” and “TS 1.1 pada paadam with Vaakyam” for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**